दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् मार्गशीर्षकृष्णनवमी
कार्तिक २८ प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-22 | 1 | नवम्बर, 13 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचलप्रदेशस्य निजी.बी.एड. महाविद्यालयेषु रिक्तानां 2658 पदानां पूर्त्यर्थं मुक्तप्रवेशप्रक्रियायाः कृते स्वीकृतिः- वि.वि शिमला

3 केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे पश्चिममध्यक्षेत्रीययुवमहोत्सवस्य सु सम्पन्नः उद्घाटनसमारोहः

4 १३ नवम्बरदिनाङ्कः महाराणा रणजीतसिंहस्य जन्मदिवसः

## सुभाषितम्

न चैवोक्ता न चानुक्ता,
हीनतः परुषा गिरः।
भारत! प्रतिजल्पन्ति,
सदा तूत्तमपुरुषाः।।

अर्थात्- हे भारत! नीच पुरुषों द्वारा कही या न कही गयी कड़वी बातों का जो कभी उत्तर नहीं देते वही श्रेष्ठ मनुष्य होते हैं।

## प्रधानमन्त्री श्रीमोदी भूटान-नरेशेण चतुर्थ-डुक्-ग्याल्पो इत्यनेन सह कालचक्र-शक्तिकरण-समारोहस्य उद्घाटनम् अकरोत्, सहैव भूटानदेशस्य द्विदिवसीया-राजकीय-यात्रां समाप्य स्वदेशम् प्रति समागतः



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्रिणः नरेन्द्रमोदिनः भूटानदेशस्य द्विदिवसीया-राजकीया-यात्रा सफला जाता। यात्रावधौ प्रधानमन्त्री श्रीमोदी भूटान नरेशेण चतुर्थ-डुक्-ग्याल्पो इत्यनेन सह कालचक्र-शक्तिकरण-समारोहस्य उद्घाटनम् अकरोत्। एकस्मिन् सामाजिक सञ्चालीय-सन्देशे प्रधानमन्त्री अवदत् यत् परम-पावन-जे-खेम्पो-महोदयेन अस्य समारोहस्य अध्यक्षता कृता, येन कार्यक्रमोऽयं इतोऽपि विशिष्टः सञ्जातः । कालचक्र-शक्तिकरणं, एकं महत्त्वपूर्ण बौद्ध-अनुष्ठानम् अस्ति, एतत् तावत् वैश्विक-शान्ति-प्रार्थना-महोत्सवस्य अंशः अस्ति, यश्च विश्वेभ्यः बौद्ध-विद्वांसः श्रद्धालवः च एकत्रिताः। इतः पूर्वं अद्य श्रीमोदी भूटानस्य चतुर्थ-नरेशेण जिग्मे सिंग्ये-वांग्चुक इत्यमुना सह मेलनं कृतवान्। हिमालयीय राष्ट्रस्य स्वीययात्रायाः प्रथमे दिने, प्रधानमन्त्री मोदी भूटानस्य ऊर्जा-परियोजनानां वित्तपोषणाय चतुस्सहस्र-कोटि-रूप्यकाणां ऋण सहायतां घोषितवान्। एषा घोषणा ह्यः थिम्फू नगरे भूटान नरेशेण सह तस्य गोष्ठ्याः परम् अभवत्, यत्र द्वावपि नेतारौ परस्पर-हितस्य क्षेत्रीय-वैश्विक विषयेषु चर्चाम् अकुरुताम्। प्रधानमन्त्री-नरेशौ च संयुक्त-रूपेण विंशत्यधिकैकसहस्र-मितायाः पुनत्सांगछू-द्वितीय-जलविद्युत परियोजनायाः उद्घाटनम् अकुरुताम् ।

### भारत-भूटान-ऊर्जा-सहयोगे एकः महत्त्वपूर्णः पदक्रमः वर्तते

उभाभ्यामपि नेतृभ्यां द्विपक्षीय-सम्बन्धान् दृढीकर्तुं नवीकरणीय ऊर्जा-क्षेत्रे, मानसिक स्वास्थ्य-सेवा-क्षेत्रे तथा स्वास्थ्य-सेवा-क्षेत्रे च त्रयाणां सन्धि-ज्ञापकानाम् आदान-प्रदानम् कृतम्। भूटान-नरेशेण दिल्ली-लालकिलायां सजाते विस्फोटे पीडितानां कृते सहस्रशैः भूटानी नागरिकैः सह प्रार्थना-सभायाः नेतृत्वं कृतम्। प्रधानमन्त्री मोदी स्वकीयेन भूटानी-समकक्षेण दाशो-शेरिंग-तोबगे इत्यमुना सहाऽपि अमिलत् । द्वावपि नेतारौ द्वादशशत-मेगावाट मितस्य पुनत्सांगछू-प्रथम-जलविद्युत-परियोजनायाः मुख्य-सेतु-बन्धे पुनः कार्य प्रारम्भस्य स्वागतम् अकुरुताम् तथा तस्य समयबद्धं समापनं सुनिश्चेतुं सहमतिं व्यक्तवन्तौ। इयं भारत-भूटानाभ्यां संयुक्तरुपेण विकसिता बृहत्तमा जलविद्युत परियोजना भविष्यति। प्रधानमन्त्री इदानीम् स्वदेशं प्रत्यागतः वर्तते। प्रधानमन्त्री स्वदेवम् आगत्य साक्षात् दिल्लीमेट्रोस्थानके विस्फोटे आहतैः जनैः सह चिकित्सालये मिलितवान्

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## प्रधानमन्त्री नरेन्द्रमोदी लोकनायक-जयप्रकाश-नारायण-चिकित्सालयं गत्वा वाहन-विस्फोटनस्य पीडितान् अभ्यगच्छत्



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्री नरेन्द्रमोदी लोकनायक-जयप्रकाश-नारायण-चिकित्सालयं गत्वा राष्ट्रिय-राजधान्यां सञ्जाते वाहन-विस्फोटनस्य पीडितान् अभ्यगच्छत्। श्रीमोदी व्रणितैः सह वार्तालापं कृत्वा तेभ्यः शीघ्र स्वस्थतां प्रार्थयत्। चिकित्सालयस्य अधिकारिणः चिकित्सकाः च तान् परिस्थितिं सूचितवन्तः। सामाजिक-अन्तर्जाल-पटलस्य एकस्मिन् संदेशे श्रीमोदिना उक्तम् यत् अस्य षड्यन्त्रस्य पृष्ठे ये सन्ति, ते न्यायस्य समक्षे नयिष्यन्ते ।

## विदेशमन्त्री डॉ. एस. जयशङ्करः स्वसमकक्षीयैः जी-सप्त देशानाम् विदेशमन्त्रिभिः सहापि मेलनं कृतवान्



**हिमसंस्कृतवार्ताः** - विदेशमन्त्री डॉ. एस. जयशङ्करः कनाडादेशस्य जी-सप्त देशानाम् विदेशमन्त्रिणां उपवेशनमतिरिच्य कनाडादेशस्य विदेशमन्त्रिणा अनीता आनन्देन सह मिलितवान्। एकस्मिन् अन्तर्जालीय संदेशे डॉ. जयशङ्करः अस्य आयोजनस्य कृते अनीता आनन्दं प्रशंसितवान्। सममेव उभयोः देशयोः मध्ये पारस्परिक संबंधाः सुदृढाः भवेयुः इति आशा प्रकटिता। डॉ. जयशङ्करः मेक्सिकोदेशस्य विदेशमन्त्रिणा डॉ. जुआन रामोन डे ला फुएन्तेवर्येण सह अपि मेलनं विहितवान्। सहैव उभयोः देशयोः मध्ये व्यापार, वाणिज्यं, स्वास्थ्य, विज्ञानं प्रौद्योगिकी चेत्यादिषु क्षेत्रेषु सहयोगं संवर्धनाय परिचर्चा विहिता। ब्रिटेन देशस्य विदेशसचिवेन यवेट कूपरवर्यया सह संभाषयन् डॉ. जयशङ्करः द्विपक्षीयसम्बन्धेषु सकारात्मक प्रगतेः पुनः पुष्टिः कृता । कार्यक्रमावधौ सः ब्राजीलदेशस्य विदेशमन्त्रिणा मौरो वियरा, जर्मनदेशस्य विदेशमन्त्रिणा जोहान वेडफुल्, दक्षिण अफ्रीकादेशस्य विदेशमन्त्रिणा रोनाल्ड् लामोला च सह मेलनं विहितवान्।

## साहित्य-अकादमी-बालसाहित्य-पुरस्कारः अस्य मासस्य चतुर्दशे दिनाङ्के प्रदास्यति

**हिमसंस्कृतवार्ताः** - पञ्चविंशत्यधिक-द्विसहस्रतमस्य वर्षस्य साहित्य-अकादमी-बालसाहित्य-पुरस्कारः अस्य मासस्य चतुर्दशे दिनाङ्के नवदेहल्यां प्रस्तूयते। बालसाहित्य-विधायाः वार्षिकपुरस्कारान् साहित्य-अकादम्याः अध्यक्षः माधव-कौशिकः प्रदास्यति। संस्कृति-मन्त्रालयेन सूचितं यत् पुरस्कार-विजेतृभ्यः कांस्यफलकं च पञ्चाशत्सहस्र-रूप्यकाणां धनराशिः च दीयते ।




## अभिनेता धर्मेन्द्रः चिकित्सालयात् स्वगृहं प्रति समागतः



**हिमसंस्कृतवार्ताः** - अभिनेता धर्मेन्द्रः चिकित्सालयात् स्वगृहं प्रति समागतः। ब्रीच कैण्डी चिकित्सालयस्य एकः चिकित्सकः मुम्बई-नगरे वार्ताहरैः सह संभाषयन् अवदत् यत् नवाशीतिः वर्षीयः अभिनेतुः अग्रिमा चिकित्सा गृहे एव भविष्यति। धर्मेन्द्रस्य पारिवारिकजनैः एकस्मिन् आधिकारिक वक्तव्ये प्रख्यापितम् यत् जनाः सार्वजनिकेषु माध्यमेषु, तस्य गोपनीयतायाः सम्मानं कुर्वन्तु। परिवारः तेषां सुस्वास्थ्यस्य कामनायै, दीर्घजीवनस्य शुभकामनायै च सर्वेषां जनानां कृते कृतज्ञतां प्रकटितवान्।

# हिमाचलप्रदेशसर्वकारः त्रिवर्षस्य कार्यकालस्य पूर्णतायां मण्ड्याम् आयोजयिष्यति राज्यस्तरीयसमारोहः



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशसर्वकारः स्वस्य त्रिवर्षस्य कार्यकालस्य पूर्णतायां मण्ड्यां ११ दिसम्बर दिनाङ्के राज्यस्तरीयम् आयोजनं करिष्यति। आयोजनस्थलस्य चयनार्थम् उच्चस्तरीया समितिः निर्मिता अस्ति, यत्र राजस्वमन्त्री जगतसिंहनेगी, तकनीकीशिक्षामन्त्री राजेश धर्माणी, धर्मपुरविधायकः चन्द्रशेखरः च सन्ति। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः बुधवासरे आयोजनस्य सज्जतायाः समीक्षायै सभायाः अध्यक्षतां कुर्वन् एतां सूचनां स्पष्टीकृतवान्। सः सर्वेभ्यः विभागेभ्यः निर्देशं दत्तवान् यत् ते सर्वाः व्यवस्थाः निर्धारितसमये एव सम्पन्नाः कुर्वन्तु। मुख्यमन्त्री उक्तवान् यत् अस्मिन् कार्यक्रमे 'व्यवस्थापरिवर्तन' उपक्रमद्वारा वर्तमानराज्यसर्वकारेण विगतत्रिवर्षेषु प्राप्तानि सकारात्मकपरिवर्तनानि प्रमुखतया प्रदर्शितानि भविष्यन्ति। सः अवदत् यत् अस्मिन् अवसरे सर्वकारस्य उपलब्धीनां, परिष्काराणां च प्रकाशनं कृत्वा कॉफी टेबल पुस्तकमपि प्रकाशितं भविष्यति। मुख्यमन्त्रिणः प्रधानपरामर्शकः रामसुभगसिंहं सूचनासंग्रहणार्थं समन्वयकरूपेण नियुक्तः अस्ति। सुखविन्दरसिंहसुक्खुः अवदत् यत् राज्यसर्वकारेण शिक्षायां, स्वास्थ्ये, ग्रामीण-अर्थव्यवस्थायां च महत्त्वपूर्णाः परिष्काराः कृताः, येन राज्ये सर्वेषु जनानां लाभः भवति। राज्यस्य अर्थव्यवस्थायाः उन्नत्या सह राजस्वस्य उत्पादनं निरन्तरं वर्धमानम् अस्ति। कार्यक्रमे विविधसर्वकारीयोजनानां लाभार्थिनः अपि भागं गृह्णन्ति इति सः अवदत्। विभिन्नक्षेत्रेषु उत्कृष्टं योगदानं दत्तवन्तः व्यक्तिः, सर्वकारीयोजनानां लाभार्थिनः च अस्मिन् कार्यक्रमे सम्मानिताः भविष्यन्ति। विकासात्मक- क्रियाकलापानां त्वरिततायै, तृणमूलस्तरस्य सर्वकारस्य प्राथमिकतानां कार्यान्वयनं सुनिश्चित्य च द्विवर्षीयं मार्गचित्रं निर्मातुं मुख्यमन्त्री अधिकारिभ्यः अपि निर्देशं दत्तवान्। सः जनानां द्वारे अधिकाः सेवाः आनेतुं, डिजिटलीकरणस्य प्रवर्धनं कर्तुं, सर्वेषु विभागेषु सुशासनं सुदृढं कर्तुं च आवश्यकतायाः उपरि बलं दत्तवान्। सभायां स्वास्थ्य एवं परिवारकल्याणमंत्री डॉ. (कर्नल) धनीरामशांडिलः, ग्रामीणविकासः एवं पंचायतीराजमंत्री अनिरुद्धसिंहः, मुख्यसचिवः संजयगुप्ता, मुख्यमंत्रिणः मुख्यपरामर्शकः रामसुभगसिंह, प्रशासनिक सचिवः, विभागाध्यक्षाः, व वरिष्ठाधिकारिणः उपस्थिताः अभवन्। राज्यस्य सर्वे उपायुक्ताः अपि आभासीयरूपेण सभायां सम्मिलिताः आसन्।

# सीएसआर- उपक्रमेण सिराजे आपदापीडितानां कृते ५७ ऋतुरोधीगृहाणि निर्मास्यति एक्सिसबैङ्कः



**हिमसंस्कृतवार्ताः- शिमला।** एक्सिसबैङ्क इत्यस्य उत्तरक्षेत्रस्य प्रमुखः अभिषेकपराशरः राज्यप्रमुखः वरुणशर्मा च मंगलवासरे ओकोवरम् इत्यत्र मुख्यमन्त्री सुखविन्दरसिंहसुक्खु इत्यनेन सह मिलितवन्तौ। तेषां निगमसामाजिकदायित्वस्य (CSR) उपक्रमस्य अन्तर्गतम् आपदाप्रभाविते मण्डीमण्डले विशेषतः सिराजविधानसभाक्षेत्रे ५७ ऋतुरोधी आश्रयस्थानानां निर्माणार्थं समर्थनं विस्तारितम्। एतेषु आश्रयस्थानेषु तापनिरोधकः, पीसीसी-तलः, पाकशाला-स्लैब, मूलभूत-विद्युत्-उपकरणैः च सुसज्जिताः भविष्यन्ति, येन विस्थापितानां परिवाराणां कृते सुरक्षितं गरिमापूर्णं च आवासं प्राप्यते। तदतिरिक्तं, बैंकः १५ सामुदायिक- शौचालय- एककाः स्थापयिष्यति, प्रत्येकं एकके त्रितः षट्-परिवाराणां कृते व्यवस्था भविष्यति। एतेषु एककेषु जलस्य भण्डारणं, स्टेनलेस स्टील- सिन्क, सीपीवीसी- पाइप- फिटिङ्ग इति च सन्ति येन समुचितस्वच्छता सुनिश्चिता भवति। एक्सिसबैङ्कः प्रभावी कार्यान्वयनार्थं रसद- प्रशासनिक- समर्थनम् अपि प्रदास्यति, यत्र लाभार्थीनां परिचयः, पर्यवेक्षणं, प्रभावी मूल्याङ्कनं च समाविष्टम् अस्ति बैंकः विशेषतया वृद्धानां, बालकानां, विकलाङ्गानां, दुर्बलसमूहानां च विषये केन्द्रितः भविष्यति। एतानि आश्रयस्थानानि भविष्ये आपत्कालेषु स्थायित्वं, पुनः उपयोगाय च, अपि च आपदासज्जतायै च निर्मिताणि सन्ति। मुख्यमन्त्री अस्याः उदात्तपरिकल्पनायाः कृते एक्सिसबैङ्कस्य धन्यवादं दत्त्वा प्रतिकूलपरिस्थित्या प्रभावितानां परिवाराणां सहायतायाम् एतादृशाः प्रयासाः सहायकाः सिद्धाः भविष्यन्ति इति च अवदत्।

# हिमाचलप्रदेशस्य

## निजी.बी.एड.महाविद्यालयेषु रिक्तानां 2658 पदानां पूर्त्यर्थं मुक्तप्रवेशप्रक्रियायाः कृते स्वीकृतिः- वि.वि शिमला

हिमसंस्कृतवार्ताः। हिमाचलप्रदेशविश्वविद्यालयेन निजी.बी.एड.महाविद्यालयेषु रिक्तानां 2658 पदानां पूर्त्यर्थं मुक्तप्रवेशप्रक्रियायाः कृते स्वीकृतिः प्रदत्ता। प्रवेशपरीक्षायां ये छात्राः न्यूनाः अंकाः प्राप्तवन्तः अथवा प्रवेशपरीक्षायां न उपस्थिताः ते अधुना आवेदनं कर्तुं शक्नुवन्ति। प्रथमचरणस्य अन्तर्जालावेदनस्य आयोजनं नवम्बर् १९तः २३ दिनाङ्कपर्यन्तं भविष्यति। विश्वविद्यालयस्य समन्वयकः अध्यक्षः च केन्द्रीयसमित्याः बी.एड. प्रवेशैः एतत् घोषितम्। प्रतिवर्षं निजी बी.एड्. एच् पी यू इत्यनेन सह सम्बद्धाः महाविद्यालयाः एनसीटीई मार्गदर्शिकायाः आधारेण पूरिताः भवन्ति, यत्र निजी बी.एड.महाविद्यालयाः अवशिष्टानि रिक्तानि आसनानि स्वयमेव पूरयन्तः । बुधवासरे विश्वविद्यालयस्य कुलपतिः प्रो.महावीरसिंहः रिक्तस्थानानि पूरयितुं अनुमतिं दत्तवान्।

# राष्ट्रपतिः द्रौपदी मुर्मुः गैबोरोन-नगरे बोत्सवाना-देशस्य राष्ट्रपतिना डुमा-बोको-इत्यनेन सह विस्तृतविषयेषु चर्चा कृतवती



**हिमसंस्कृतवार्ताः -** राष्ट्रपतिः द्रौपदी मुर्मुः गैबोरोन-नगरे बोत्सवाना-देशस्य राष्ट्रपतिना डुमा-बोको-इत्यनेन सह द्वैपाक्षिकं वार्तालापं कृत्वा परस्पर हितस्य विस्तृतविषयेषु चर्चा कृतवती। व्यापार-निवेशे, कृषौ, पुनर्नवीकरणीय ऊर्जायाम्, स्वास्थ्ये, शिक्षायाम्, कौशल विकासे, रक्षणे, डिजिटल-प्रौद्योगिक्यां एतादृशेषु प्रमुखेषु क्षेत्रेषु सहयोगं वर्धयितुं विस्तृत चर्चासु उभयनेतृभ्यां सहमतिः प्रकटिता ।
अङ्गोला-देशस्य प्रवासं समाप्य राष्ट्रपतिः मुर्मुः अफ्रीका महाद्वीपस्य द्विराष्ट्र-यात्रायाः अन्तिमे चरणे बोत्सवाना-देशं गतवती। सामाजिक-अन्तर्जालीय-संदेशे राष्ट्रपतिः मुर्मुः चीतापरियोजनायाः अग्रिम-चरणस्य अन्तर्गतं भारतं प्रति व्याघ्राणां प्रेषणार्थं राष्ट्रपति बोकों तथा बोत्सवाना-देशस्य जनेभ्यः धन्यवादं प्रकटितवती। अस्मिन् अवसरे बोत्सवाना-देशस्य नागरिकाणां कृते उच्च गुणवत्तायुक्ताः तथा सुलभ-मूल्यात्मकाः भारतीय-औषधयः सुलभतया प्राप्यन्ते इति सन्धिपत्रे अपि हस्ताक्षरितानि कृतानि ।

# आधुनिकयुद्धस्य कृते प्रौद्योगिक्याः लोकतंत्रीकरणस्य भौगोलिक-प्रसारस्य, उपयोगस्य च आह्वानं कृतवान् जनरल उपेन्द्र द्विवेदी



**हिमसंस्कृतवार्ताः -** सेना प्रमुखः जनरल उपेन्द्र द्विवेदी आधुनिकयुद्धस्य कृते प्रौद्योगिक्याः लोकतंत्रीकरणस्य भौगोलिकप्रसारस्य, उपयोगस्य च आह्वानं कृतवान्। नवदेहल्यां सञ्जाते दिल्ली-रक्षा-संवाद इति कार्यक्रमे सम्बोधयन् श्री द्विवेदी-महोदयः अवदत् यत् भारतीय-सेना मानव-केन्द्रित-प्रौद्योगिकी इत्यादिषु क्षेत्रेषु संवर्धनार्थं विचारं करोति।

# केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे

## पश्चिममध्यक्षेत्रीययुवमहोत्सवस्य सुसम्पन्नः उद्घाटनसमारोहः







हिमसंस्कृतवार्ताः। केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे पश्चिममध्यक्षेत्रीय-युवमहोत्सवस्य उद्घाटनसमारोहः सम्पन्नः। कार्यक्रमे मुख्यातिथिरूपेण समुपस्थितेन राजस्थानसर्वकारस्य उपमुख्यमन्त्रिणा डॉ. प्रेमचन्दबैरवावर्येण कथितं यत् संस्कृत्या सह संस्कृतस्य साक्षात् सम्बन्धः अस्ति। तेन उक्तं यत् संस्कृतं भारतस्य आत्मा अस्ति। वर्तमानसमये संस्कृतस्य महत्त्वम् आधिक्येन वर्तते। यतोहि अमेरिकादेशस्य सुप्रसिद्धा संस्था नासा प्रतिपादयति यत् अन्तरिक्षे सन्देशप्रेषणाय संस्कृतभाषा एव सर्वोत्कृष्टं स्थानं भजते। डॉ. प्रेमचन्दबैरवामहोदयेन कथितं यत् अहं केन्द्रीयसंस्कृतविश्वविद्यालस्य जयपुरपरिसरे आगत्य आत्मानं धन्यं मन्वे। तेन आश्वासनं प्रदत्तं यत् जयपुरपरिसराय सर्वकारेण भूमिखण्डं प्रदातुं प्रयासः करिष्यते। राजस्थानसंस्कृत-अकादम्याः अध्यक्षः डॉ. लताश्रीमालीमहोदया अवदत् यत्। संस्कृत-अकादम्या पाण्डुलिपीनां संरक्षणाय, सम्वर्धनाय, संशोधनाय, सम्पादनाय च कार्यं क्रियमाणं वर्तते। अतः संस्कृतच्छात्राः संस्कृत-अकादम्या सह संयुक्ताः भवन्तु। संस्कृत-अकादमीद्वारा 'एक कदम, संस्कृत की ओर' इति अभियानं सञ्चाल्यते। युवानः सन्ति चेत् भारतम् अस्ति, भारताद् वयं स्मः इति प्रेरणावाक्यं तया उक्तम्। संस्कृत-अकादम्या स्वरमङ्गला इति काचित् विशिष्टा पत्रिका प्रकाश्यते तत्रापि छात्राः स्वलेखान् दातुम् अर्हन्ति। अन्ते सा सर्वान् शुभकामनाभिः अभिनन्दितवती। आचार्य-वाई.एस. रमेशमहोदयेन उक्तं यद् यूनां क्रीडकानाम् उपस्थित्या महोत्सवोऽयं सफलतां प्रति याति। महोदयेन उपस्थितानां समेषां विदुषाम् उपमुख्यमन्त्रिणश्च वाचा स्वागतं विहितम्। अनेन महोत्सवेन ज्येष्ठेष्वपि युवत्वं समायातम् इति। महोदयेन उपमुख्यमन्त्री निवेदितो यत् परिसराय भूखण्डस्य व्यवस्था स्यात्। सर्वेषां स्वागतं कृत्वा स्वभाषणाद् व्यरमत। परिसरनिदेशकः भूखण्डस्य कृते आश्वासनं प्रदत्तवते उपमुख्यन्त्रिणे धन्यवादं प्रादात्। अस्माकं विश्वविद्यालयेन् भिन्न-भिन्नस्थलेषु अयं महोत्सवः समनुष्ठीयते। महोत्सवेन अनेन वसुधैवकुटुम्बकम् इति काचित् विशिष्टा भावना जागरिता भवति। निदेशकः छात्रान् उपदिशन् अवदत् यत् क्रीडासु प्रतिस्पर्धा कर्तव्या वैयक्तिकी प्रतिस्पर्धा न कर्तव्या इति। अन्ते परिसरस्य सहनिदेशकः प्रो. बोधकुमारझामहोदयः धन्यवादज्ञापनम् अकरोत्। अस्य कार्यक्रमस्य सञ्चालनं डॉ. रानीदाधीचमहोदया अकरोत्।

# इमकोङ्ग एल इम्चेन् इत्यस्य

## निधने दुःखं प्रकटितवान् प्रधानमन्त्री



प्रधानमन्त्री नरेन्द्रमोदी नागालैण्डभाजपानेतुः इमकोङ्ग एल इम्चेन् इत्यस्य निधने दुःखं प्रकटितवान्। सामाजिकमाध्यमे सन्देशे मोदीमहोदयः अवदत् यत् इम्चेन् महोदयः नागालैण्ड्-प्रदेशस्य विकासाय उत्कृष्टं योगदानं दत्तवान् इति स्मर्यते। प्रधानमन्त्रिणा टिप्पणीकृता यत् इम्चेन् महोदयः बहुवर्षेभ्यः सार्वजनिकजीवने सक्रियः आसीत्, विशेषतया आदिवासीसमुदायस्य कल्याणाय समर्पितः च आसीत् । सः अवदत् यत् इम्चेन् महोदयः नागालैण्ड्-प्रदेशे भाजपायाः सुदृढीकरणे योगदानं दत्तवान्, तस्य मन्त्री-विधायकत्वेन च कार्यकालः सर्वदा स्मर्यते इति।

# हिमाचलप्रदेशशिक्षामण्डलस्य निर्णयः – दशमी-द्वादशी-कक्ष्ययोः प्रमाणपत्रेषु यू–डायस–संकेतः लिखितः भविष्यति

**हिमसंस्कृतवार्ताः – डॉ पद्मनाभः, धर्मशाला।** अधुना हिमाचलप्रदेशे दशमीद्वादशीकक्ष्याः उत्तीर्णविद्यार्थिनां प्रमाणपत्रेषु यू–डायस (यूनिफाइड् डिस्ट्रीक्ट् इन्फर्मेशन् सिस्टम् फॉर् एजुकेशन्) इति संकेतः अंकितः भविष्यति। पूर्वं यः विद्यालयस्तरीयः संकेतः अंकतालिका–पत्रेषु लिख्यते स्म, सः अधुना यू–डायस–संकेतनेन प्रतिस्थाप्यते। अस्य निर्णयस्य फलस्वरूपेण अन्येषु राज्येषु प्रवेशं कुर्वन्तः विद्यार्थिनः तेषां विद्यालयस्य च सर्वविवरणम् अस्मिन् संकेतनेन ज्ञातुं शक्नुवन्ति।

सूचनानुसारं हिमाचलप्रदेशविद्यालयशिक्षामण्डलम् दशमीद्वादशीकक्ष्याविद्यार्थिनां अंकतालिकासु लिख्यमानान् विद्यालयसंकेतान् यू–डायस–संकेतैः प्रतिस्थापयितुं योजनां कृतवान् अस्ति। अस्य मण्डलस्य प्रयासेन अन्यराज्यानि प्रति स्थानान्तरं कुर्वन्तः विद्यार्थिनः तेषां विद्यालयस्य विवरणं राष्ट्रीयस्तरेण ज्ञातुं शक्नुवन्ति।

एषा संकेतव्यवस्था राष्ट्रीयस्तरेण प्रवर्तिता अस्ति। हिमाचलप्रदेशस्य सर्वे सर्वकार्याः निजी च विद्यालयाः यू–डायस–संकेतैः योजिताः सन्ति। प्रत्येकस्य विद्यालयस्य स्वकीयः यू–डायस–संकेतः अस्ति। अस्य लाभः अयं यत् यदि कोऽपि विद्यार्थी पितरौकृत्यनिमित्तं अन्यराज्यस्य विद्यालये प्रवेशं करोति, तर्हि तस्य पूर्वविद्यालयस्य सर्वविवरणं सुलभतया ज्ञातुं शक्यते।

विद्यालयशिक्षामण्डलस्य सचिवः डॉ० मेजर् विशाल् शर्मा इत्यनेन उक्तं यत् अस्य यू–डायस–संकेतस्य निर्गमनं मण्डलात् न भविष्यति, अपितु सर्वे सर्वकारीयाः निजी च विद्यालयाः पूर्वमेव एतेन संकेतनेन अंकिताः सन्ति। अधुना एषा व्यवस्था राष्ट्रीयस्तरेण क्रियते। शिक्षामण्डलस्य प्रस्तावः अस्ति यत् दशमीद्वादशीकक्ष्याविद्यार्थिनां प्रमाणपत्रेषु विद्यालयसंकेताः यू–डायस–संकेतैः प्रतिस्थाप्येरन् इति।

# नौसेनाप्रमुखः एड्मिरल् दिनेश के. त्रिपाठी अमेरिकादेशस्य आधिकारिकयात्रायां गतवान्



नौसेनाप्रमुखः एड्मिरल् दिनेश के. त्रिपाठी अमेरिकादेशस्य आधिकारिकयात्रायां भविष्यति। रक्षामन्त्रालयेन उक्तं यत् षड्दिवसीययात्रायाः उद्देश्यं भारतीयनौसेनायाः संयुक्तराज्यस्य नौसेनायाः च मध्ये सशक्तं स्थायिरूपेण च समुद्रीयसहयोगम् अधिकं सुदृढं कर्तुं वर्तते। मन्त्रालयेन उक्तं यत् भारत-प्रशांतक्षेत्रे साझीकृतसमुद्रीप्राथमिकतासु, मिलान इत्यादिषु बहुपक्षीयरूपरेखासु सहकार्यं, संयुक्तसमुद्रीबलपरिकल्पनेषु च चर्चाः केन्द्रीभवन्ति। भ्रमणकाले त्रिपाठीमहोदयः अमेरिकीयुद्धविभागस्य वरिष्ठाधिकारिभिः अन्यैः गणमान्यैः सह चर्चां करिष्यति। मन्त्रालयेन उक्तं यत् एते अन्तरक्रियाः विद्यमानसमुद्रीसहकार्यस्य समीक्षां कर्तुं, परिचालनस्तरीयसम्बन्धान् वर्धयितुं, द्वयोः नौसेनायोः मध्ये सूचनासाझेदारी, समुद्रीयक्षेत्रजागरूकतातन्त्राणि च सुदृढां कर्तुं च अवसरं प्रदास्यन्ति।


# आगामिकेन्द्रीयायव्ययः २०२६-२७ इत्यस्य सज्जतायां वित्त-निगम-कार्याणां मन्त्री निर्मला-सीतारमणः संगोष्ठीं कृतवती

दिल्लीनगरे आगामिकेन्द्रीयायव्ययः २०२६-२७ इत्यस्य सज्जतायां वित्त-निगम-कार्याणां मन्त्री निर्मला-सीतारमणः सूक्ष्म-लघु-मध्यम-उद्यम-क्षेत्रस्य हितधारकैः सह तृतीय-बजट-पूर्व-परामर्श-सभायाः अध्यक्षतां कृतवती। वित्तमन्त्रालयेन सामाजिकमाध्यमेन सूचितं यत् आगामिकेन्द्रीयबजटस्य सन्दर्भे एषा सभा आयोजिता। सभायां केन्द्रीयवित्तराज्यमन्त्री पंकजचौधरी, आर्थिकविभागस्य सचिवः, सूक्ष्मलघुमध्यमउद्यममन्त्रालयस्य वरिष्ठाधिकारिणः अपि उपस्थिताः आसन् । एषा सभा वित्ताधिकारिभिः वित्तमन्त्रिणा च वार्षिकबजटस्य निर्माणात् पूर्वं संसदि प्रस्तुतीकरणात् पूर्वं विभिन्नैः हितधारकैः सह परामर्शस्य चर्चायाः च प्रक्रिया अस्ति

# १३ नवम्बरदिनाङ्कः महाराणा रणजीतसिंहस्य जन्मदिवसः



महाराजा रणजीतसिंह (१७८०-१८३९) सिक्ख साम्राज्यस्य प्रथमः महाराजः आसीत् । सः शेर-ए-पञ्जाबः इति नाम्ना प्रसिद्धः अस्ति । महाराजा रणजीतसिंहः एकः पुरुषः आसीत् यः न केवलं पञ्जाबं एकीकृतवान् अपितु आङ्ग्लानां साम्राज्यमपि स्वजीवने निवारितवान् ।
रणजीतसिंहस्य जन्म १७८० तमे वर्षे नवम्बर्-मासस्य १३ दिनाङ्के गुजरान्वाला-नगरस्य (अधुना पाकिस्तानस्य) महाराजा-महासिंहस्य गृहे अभवत् । तस्मिन् समये पञ्जाब्-देशे सिक्ख-अफगानिस्तान-जनाः शासनं कुर्वन्ति स्म, ये अस्य प्रदेशस्य अनेक-मिस्ल-रूपेण विभक्ताः आसन् । रञ्जितस्य पिता महासिंहः पश्चिमपञ्जाबस्य गुजरान्वाला-प्रदेशे मुख्यालयस्य सुकेरचकिया-मिसलस्य सेनापतिः आसीत् । महाराज रञ्जीतसिंहस्य चेचकस्य कारणेन अल्पवयसि एव एकस्मिन् नेत्रे दृष्टिः नष्टा अभवत् । यदा तस्य पिता मृतः तदा सः केवलं १२ वर्षीयः आसीत्, तस्मात् राज्यस्य दायित्वं तस्य कृते त्यक्तवान् ।रणजीतसिंहः १८०१ तमे वर्षे एप्रिल-मासस्य १२ दिनाङ्के महाराजस्य उपाधिं स्वीकृतवान् ।गुरुनानकस्य वंशजः तस्य राज्याभिषेकं कृतवान् । सः लाहौरं राजधानीम् अकरोत्, १८०२ तमे वर्षे अमृतसरनगरं गतः । महाराजा रणजीतः अफगानिस्तानस्य विरुद्धं अनेकानि युद्धानि कृत्वा तान् पश्चिमपञ्जाबदेशं प्रति प्रेषितवान् । सः इदानीं पेशावरसहितस्य पश्तूनप्रदेशस्य नियन्त्रणं प्राप्तवान् । एतत् प्रथमवारं पश्तूनानां शासनं अमुस्लिमशासकस्य हस्ते आसीत् । तदनन्तरं पेशावरं, जम्मू-कश्मीरं, आनन्दपुरं च गृहीतवान् । प्रथमा आधुनिकभारतीयसेना-सिक्खखालसासेना-इत्यस्य स्थापनायाः श्रेयः अपि तस्मै प्राप्यते । तस्य संरक्षणे पञ्जाबप्रान्तः अधुना शक्तिशाली प्रान्तः आसीत् । एषा शक्तिशालिनी सेना ब्रिटेनशासनं पञ्जाबदेशस्य विलीनीकरणं चिरकालं यावत् अवरुद्धवती । एकः समयः आसीत् यदा पञ्जाबः एकमात्रः प्रान्तः आसीत् यत्र आङ्ग्लानाम् अधिग्रहणं नासीत् । ब्रिटिश-इतिहासकारस्य जे.टी. व्हीलर इत्यस्य मते यदि सः एकं पीढीं प्राचीनः स्यात् तर्हि सः सम्पूर्णं भारतं जेतुमुत्सकः आसीत् । महाराज रञ्जीतसिंहः स्वयं निरक्षरः आसीत्, परन्तु सः स्वराज्ये शिक्षां कलां च बहु प्रोत्साहितवान् ।
सः पञ्जाबप्रान्ते विधिव्यवस्थां स्थापितवान्, कदापि कस्यचित् वधं न कृतवान् ।तस्य प्रान्तः धर्मनिरपेक्षः आसीत्; हिन्दुषु सिक्खेषु च गृहीतं जाजियाकरं अपि सः निरस्तं कृतवान् । सः कदापि कस्यचित् सिक्खधर्मं स्वीकर्तुं बाध्यं न कृतवान् । अमृतसर-नगरस्य हरिमन्दिरसाहिबगुरुद्वारे तस्य संगमरवर-सुवर्ण-लेपनं स्थापितं, ततः परं स्वर्णमन्दिरम् इति कथ्यते । बहुमूल्यं हीरकं कोहिनूरं महाराजा रणजीतसिंहस्य कोषस्य गौरवम् आसीत् । महाराजा रणजीतसिंहस्य मृत्युः १८३९ तमे वर्षे अभवत् ।तस्य समाधिः लाहौरनगरे निर्मिता, या अद्यापि तत्रैव तिष्ठति । तस्य मृत्योः अनन्तरं आङ्ग्लाः पञ्जाब-प्रदेशे स्वपरिग्रहं कठिनं कर्तुं आरब्धवन्तः । आङ्ग्ल-सिख-युद्धस्य अनन्तरं १८४९ तमे वर्षे मार्चमासस्य ३० दिनाङ्के पञ्जाबप्रदेशः आङ्ग्लसाम्राज्ये विलीनः अभवत्, कोहिनूर्-नगरं विक्टोरिया-देशाय प्रस्तुतम् ।



# वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
काव्या- नमस्ते नन्दिनि। अद्यतनी वार्ता अतीव रोचकी अस्ति। एका खगोलज्ञा शनिग्रहस्य वलयानां विषये चलच्चित्रं रचितवान् अस्ति।
नन्दिनी- आम्, तत् चलच्चित्रं तु अतीव सुन्दरं स्यात्। किन्तु इतः अपि एका आश्चर्यकरवार्ता श्रूयते। अर्जेन्टिनादेशे 'भयजनकः' इति नामकस्य भीमसरटस्य नूतना प्रजातिः प्राप्ता अस्ति।
काव्या- 'भयजनकः' इति नामकः भीमसरटः तु सत्यमेव भयजनकः। किन्तु भूलोकात् आकाशं गच्छामः। वैज्ञानिकैः अरुणग्रहतः प्रथमवारं क्ष-किरणाः अन्विष्टाः।
नन्दिनी- अरुणग्रहतः क्ष-किरणाः? एतत् तु महद् आश्चर्यम्। किन्तु पुनः भूलोकं प्रत्यागच्छामः। संयुक्त-अधिराज्ये षट्सहस्रवर्षपुरातनं लवणकेन्द्रम् अन्विष्टम् अस्ति।
काव्या- षट्सहस्रवर्षपुरातनं लवणकेन्द्रम्! अस्माकं पूर्वजाः कियन्तः ज्ञानिनः आसन् इति अनेन ज्ञातम्। अद्यतनी वार्ता तु अतीव रोचकी आसीत्। श्वः पुनः मिलावः। धन्यवादः।
नन्दिनी- आम्, सत्यमेव। धन्यवादः काव्ये। अद्यतनः कार्यक्रमः अत्रैव समाप्तः। श्वः पुनः मिलामः। नमो नमः।

## "लौकिकन्यायकोशः"

## "तत्प्रख्यान्यायः"

अग्निहोत्रं जुहुयात् इत्यस्मात् विधेः अनन्तरम् आहुतिविषये का देया इति संशयो भवति, तदा अग्निहोत्रशब्दस्य सामर्थ्येन हविः देयमिति अर्थे ग्रह्यते। यथा- तत्प्रख्यं चान्यशास्त्रम्। तत्स्थगुणस्थप्रख्यं प्रापकमन्यशास्त्रं यत्र भवति। अग्निहोत्रं जुहोति इत्यत्र उत्पत्तिविधिः। दध्ना जुहोति इत्यत्र गुणविधिः तत्प्रख्यन्यायेन अग्निहोत्रशब्दस्य नामधेयत्वं प्राप्यते। मीमांसाशास्त्रगतः अयं न्यायः।

**डा. वर्षा प्रकाश टोणगांवकरः पुणे / महाराष्ट्रम्**

# मन करदा इक्क छोटा जेया मैं बी टपरू बणाऊं

कखाँ रे मकान हुंदे थे पहले
फेरी खपरैलां स्लेटां रे मकान आये
फेरी आये सरिये सीमेंटा रे
तिन्हें जे सारे संस्कार मुकाये
सै संस्कार वापिस कियां ल्याऊं
मन करदा इक्क छोटा जेया मैं बी टपरू बणाऊं

कच्चे मकान तांजे गए
तां आपसी प्यार भाईचारा भी गया
हुण तां सरिये सिमेंटा रे मकान ही रये
बाकी खत्म हुई गया कुछ नी रहया
सैजे नी रहया तिसजो वापिस किया ल्याऊं
मन करदा इक्क छोटा जेया मैं बी टपरू बणाऊं

कदी कदी मन करदा दूर जंगला रे नेड़े
मिट्टी गारे कने इक्क टपरू बणाऊं
चकंदेयाँ कने बणाइये तिसरी कंधां
बैंजा रे होवे गज्ज कने ऊपर सरवाड़ा ने छावूं
पर सै छाणे वाले हुण किता ते ल्याऊं
मन करदा इक्क छोटा जेया मैं बी टपरू बणाऊं

बैठी कने दिसे बाहरा रा नज़ारा बौड़ी हो द्वारियाँ
हुक्के री गुड़गुड़ कलिया री नड़ी धुवां मारे उडारियाँ
जमणी री होवे कड़ियाँ कने तुणिये रा हो संतीर
भितर हो गोवे कने लिपिरा हांगां हो बड़ी छैल पाईरियाँ
पर भितरा हांगा गोलू किसते फराऊं
मन करदा इक्क छोटा जेया मैं बी टपरू बणाऊं

खुला जेया हो अंगन पत्थरां रे चक्केयाँ ने सैलीरा
उक्खल़ कने सिल बत्तू हो अंगणा ते पार रखीरा
बैठणे जो इक्क कच्चा ब्यूह हो बड़ा मज़ेदार
हर तवाहरा पर रिस्तेदारां री होवे खूब भरमार
पर एहड़े रिश्तेदार हुण किता ते बुलाऊं
मन करदा इक्क छोटा जेया मैं बी टपरू बणाऊं

सियूंटिया री हो द्वारसाखां कने तुणिये रे हो भित
रंदाई मारी कने बणे बधिया डिज़ाइन चुभे न कोई लित
बौड़ी होवे चुल्ह कने पौड़े होवे ल्यारु
चढ़यातर होवे लकड़ूआं ने भरीरि लगना नी फेरी शीत
यादां ई तां अई इक्क सहारा इन्हांजो कियां मैं भुलाऊं
मन करदा इक्क छोटा जेया मैं बी टपरू बणाऊं

**रवींद्र कुमार शर्मा**
**घुमारवीं**
**जिला बिलासपुर हि प्र**

